Digitized by Arya Samaj Foundation Chennai and eGangotri

0
5.1

॥ ओं श्री गणेश सारवा गुरुभ्यो नमः ॥

॥ श्री वेदव्यासाय नमः ॥

॥ उदकशान्ति मन्त्रपाठः ॥

For copies of this book please contact-
Shri S. Parameswaran
"Vedalaya"
14/52, Manjula,
Pestom Sagar Rd. No.2
Chembur, Mumbai-400 089.
Tel: 2 524 2155

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ओं गणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। उदकशान्तिमन्त्रपाठः ।।

(संहितावत् - सानुषङ्गश्च)

For Private Circulation Only

For copies of this book please contact-
Shri Parameswara Sharma
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

।। श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ।।

मुद्रा

श्रीमत्परमहंसपरिव्राचकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायाम प्रत्याहार धारणाध्यानसमाध्यष्टाङ्गयोगानिष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्ग प्रवर्तक सर्वतन्त्र-स्वतन्त्रादिराजधानी विद्यानगर महाराजधानी कर्णाटकसिंहासन प्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामि गुरुकरकमलसञ्जात

।। श्रीजगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थस्वामिभिः ।।

अस्मदत्यन्तप्रियशिष्य श्रीपरमेश्वरशर्म विषये नारायणस्मरणपुरस्सर विरचिता आशिषस्समुल्लसन्तु।

भवन्तः वेदमधीत्य शिष्यानध्यापयन्तः अधुना लोकानामुपकाराय अत्यावश्यक वेदभागान् स्थूलाक्षरैः सस्वरं प्रकाशयन्तीति विदित्वा भृशं मोदामहे। अत्र हि रुद्रक्रमः महान्यासः उदकशान्तिरित्यादयः प्रकाशिता ये सर्वेषामत्यन्तमावश्यकाः। भवदीयोऽयमुद्यमः धर्मश्रद्धालूनामास्तिकानां प्रशंसापात्रमिति तु निश्चप्रचम्।

श्री शारदाचन्द्रमौळीश्वरयोरसीमया कृपया इमे ग्रन्थाः आस्तिकजन पाणिपल्लवान्यलंकुर्वन्तु भवन्तश्च श्रेयःपरम्पराभिस्समेधन्तामित्याशास्महे।।

इति नारायणस्मरणम्

शृङ्गगिरिः
प्रमाथिश्रावणकृष्णाष्टमी भार्गववासरः
३-९-१९९९

मुद्रा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

SRI GURUBHYO NAMAHA



MUTUAL TRUST — FRIENDSHIP — TOLERANCE—OUR TRADITION

Sri Sankara Jayanthi Celebration Committee

6, Savitha, 70,Pestomsagar, 2nd Road, Tilaknagar P.O., BOMBAY - 89.
Tel. Nos. : 5241864

Date

FOREWORD

Shri Parameswara Sharma has been conducting Veda Classes in Pestom Sagar Chembur, for over two decades, and has trained over a hundred vidyarthis comprising of a wide range of asthikas covering school children, college boys, office-goers and retired elders. He has been associated with our Shri Sankara Jayanthi Celebration Committee for the past 16 years conducting Rudra-japa-abhisheka-puja along with his disciples.

Shri Parameswara Sharma's teaching skill and the recitation of vedic hymns by his disciples have been appreciated by many eminent vedic scholars and patrons of Religious & Cultural Organisations.

A momentous occasion was in June 1994, when, pleased with the excellent Ghana recitation by a few of Parameswara Sharma's young disciples,and in appreciation of his glorious spiritual service,HisHoliness Shri Bharathi Theertha Swamigal, Sringeri Mutt blessed and honoured him with a *'Ponnadai'*.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Besides conducting veda classes, Shri Parameswara Sharma devotes his available time in compiling Vedic Literature into convenient books, in bold print, very useful to vidyarthis and religious practioners. He has compiled the following books :-

RUDRAM -CHAMAKAM
RUDRA KRAMAM
CHAMAKA KRAMAM
MAHANYASAM
UDAKA SHANTHI
ACHIDRAM
ASWAMEDHAM (I)

Copies of books compiled by Parameswara Sharma were presented to HIS HOLINESS SHRI BHARATHI THEERTHA SWAMIGAL, for His approval & blessings. His Holiness has gone through the books and has expressed His happiness and said that the books are very good and would be useful to the students

Appreciating his effort & dedication, His Holiness has blessed Shri Parameswara Sharma with a *SHREEMUKHAM.*

I, on behalf of the Sri Sankara Jayanthi Celebration Committee, pray to Almighty to bestow upon Shri Parameswara Sharma, a healthy, blissful and long life to continue his noble social service of propagating Vedas and Vedic Culture among the youth and active citizens.

V. Venkitachalam

V. Venkitachalam
Secretary
Sri Sankara Jayanthi Celebration Committee

13th September 1999.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदकशान्तिमन्त्रपाठः।

विषयानुक्रमणिका

०१.	अग्निमीळे	००१
०२.	कृणुष्वपाजः	००२
०३.	इन्द्रं वो विश्वतस्परि	००७
०४.	यत इन्द्र भयामहे	०११
०५.	ये देवाःपुरस्सदः	०१३
०६.	अग्निरायुष्मान्	०१३
०७.	यावामिन्द्रावरुणा	०१४
०५.१	*ये देवाःपुरस्सदः (सानुषङ्गः)*	०१५
०६.१	*अग्निरायुष्मान् (सानुषङ्गः)*	०१७
०७.१	*यावामिन्द्रावरुणा (सानुषङ्गः)*	०१८
०८.	अग्ने यशस्विन्	०२१
०९.	ऋताषाडृतधामा	०२२
०९.१.	*सानुषङ्गः (बोधायनरीत्या)*	०२५
०९.२	*सानुषङ्गः (आपस्तबरीत्या)*	०२९
१०.	नमो अस्तु सर्पेभ्यः	०३४
११.	अयं पुरो हरिकेशः	०३५
११.१.	*अयंपुरो हरिकेशः (सानुषङ्गः)*	०३७
१२.	आशुश्शिशानो वृषभः	०४०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणिका

१३.	शञ्च मे	०४४
१४.	ममाग्ने वर्चः	०४६
१५.	अग्नेर्मन्वे	०४९
१६.	समीची नमासि	०५५
१७.	हेतयो नामस्थ तेषां	०५६
१६.१	समीची नामासि (सानुषङ्गः)	०५८
१७.१	हेतयो नामस्थ (सानुषङ्गः)	०६०
१८.१	शतायुधाय	०६३
१९.	भूतं भव्यं भविष्यत्	०६४
२०.	इन्द्रो दधीचो अस्थभिः	०६५
२१.	चक्षुषो हेते	०६७
२२.	प्राणो रक्षति	०६९
२३.	सि हे व्याघ्र उत	०७२
२४.	अहमस्मि प्रथमजाः	०७७
२५.	तासूर्या चन्द्रमसा	०८७
२६/२९.	अग्निर्न पातु कृत्तिकाः +	०९६
	उपहोममंत्राः	०९६
२७/३०.	ऋध्यास्महव्यैः + उपहोममंत्राः	१०९
२८/३१	नवोनवो भवति +	१२२
	उपहोममंत्राः	

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणिका

३२.	दधिक्राव्णो अकार्षम्	१३०
३३.	उदुत्तमं वरुणपाशम्	१३०
३४.	हिरण्यवर्णा श्शुचयः	१३२
३५.	पवमानः	१३३
३६.	भूर्भुवस्सुवः। तच्छंयोः	१३७
३७.	आयुष्यसूक्तम्	१३८
३८.	विष्णो त्वन्नो	१४०
३९.	नमो ब्रह्मणे	१४१
४०.	आभिर्गीर्भिः	१४१
	देवस्यत्वा सवितुः	१४२
	आयुराशास्ते	१४३
	द्रुपदादिवेन्मुमुचानः	१४४

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ओं गणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। उदकशान्तिमन्त्रपाठः ।।

।। हरिः ओ(४)म् ।।

१ अग्निमीळे पुरोहितँ य्यज्ञस्य देवमृत्विजम्। होतारं रत्न धातमम्।।

इषेत्वोर्जे त्वा वायवस्स्थोपायवस्स्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे।।

अग्न आयाहि वीतये गृणानो हव्य-दातये। निहोता सत्सि बर्हिषि।।

शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शँय्योरभिस्रवन्तु नः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२ कृणुष्वपाजः प्रसितिन्न पृथ्वीँ-य्याहि राजेवामवाँ इभेन। तृष्वीमनु प्रसितिन्द्रूणानो ऽस्ताऽसि विद्ध्य रक्षसस्तपिष्ठैः।।

तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः। तपूँष्यग्ने जुह्वा पतङ्गान-सन्दितो विसृज विष्वगुल्काः।।

प्रतिस्पशो विसृज तूर्णितमो भवापायु-र्विशो अस्या अदब्धः। योनो दूरे अघशँसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत्।।

उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते। यो नो अरातिँ समिधान

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम्।।

ऊद्ध्वो भव प्रतिविद्ध्याद्ध्यस्मदा-

विष्कृणुष्व दैव्यान्यग्ने। अवस्थिरा तनुहि

यातुजूना-ञ्जामिमजामिं प्रमृणीहि शत्रून्।।

सते जानाति सुमतिँय्यविष्ठ य ईवते

ब्रह्मणे गातुमैरत्। विश्वान्यस्मै सुदिनानि

रायो द्युम्नान्यर्यो विदुरो अभिद्यौत्।।

सेदग्ने अस्तु सुभगस्सुदानुर्यस्त्वा नित्येन

हविषा य उक्थैः। पिप्रीषति स्व आयुषि

दुरोणे विश्वेदस्मै सुदिनासाऽसदिष्टिः।।

अर्चामि ते सुमतिङ्घोष्यर्वाक्सन्ते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वावाताजरताम्यङ्गीः। स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनुद्यून्।।

इहत्वा भूर्याचरेदुपत्म-न्दोषावस्त-र्दीदिवा७ समनुद्यून्। क्रीडन्तस्त्वा सुमनस-स्सपेमाभि-द्युम्ना तस्थिवा७सो जनानाम्।।

यस्त्वा स्वश्व-स्सुहिरण्यो अग्न उपयाति वसुमता रथेन। तस्य त्राता भवसि तस्य सखा यस्त आतिथ्य-मानुषग्जुजोषत्।।

महो रुजामि बन्धुता वचोभि- स्तन्मा पितुर्गोतमादन्वियाय। त्वन्नो अस्य वचस-श्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्वप्नज-स्तरणय-स्सुशेवा अतन्त्रासो-
ऽवृका अश्रमिष्ठाः। ते पायव-स्सद्धियञ्चो
निषद्याग्ने तव नः पान्त्वमूर।।

ये पायवो मामतेयन्ते अग्ने पश्यन्तो
अन्धन्दुरितादरक्षन्। ररक्षतान्स्थ्सुकृतो विश्व-
वेदादिफ्सन्त इद्रिपवो नाह देभुः।।

त्वया वयꣳसधन्य-स्त्वोता-स्तव
प्रणीत्यश्याम वाजान्। उभा शꣳसा सूदय
सत्यतातेऽनुष्ठुया कृणुह्य ह्याण।।

अया ते अग्ने समिधा विधेम प्रतिस्तोमꣳ
शस्यमानङ्गृभाय। दहाशसो रक्षसः पाह्यस्मा-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्द्रुहो निदो मित्रमहो अवद्यात्।।

रक्षोहणँ-व्वाजिनमाजिघर्मि मित्रं प्रतिष्ठ-मुपयामि शर्म। शिशानो अग्निः क्रतुभि-स्समिद्ध-स्सनो दिवा सरिषः पातु नक्तम्।।

विज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा। प्रादेवीर्माया-स्सहते दुरेवा-श्शिशीते शृङ्गे रक्षसे विनिक्षे।।

उतस्वानासो दिविषन्त्वग्ने-स्तिग्मायुधा रक्षसे हन्तवा उ।। [मदेचिदस्य प्ररुजन्ति भामा नवरन्ते परिबाधो अदेवीः।।]

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३ इन्द्रँव्वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः।

इन्द्रन्नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः। शूरो नृषाता शवसश्चकान आगोमति व्रजे भजात्वन्नः।

इन्द्रियाणि शतक्रतो याते जनेषु पञ्चसु। इन्द्र तानि त आवृणे।

अनुतेदायि मह इन्द्रियाय सत्राते विश्वमनु वृत्रहत्ये। अनुक्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये।

आयस्मिन्थ्सप्त वासवा-स्तिष्ठन्ति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वारुहो यथा। ऋषिर्ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः।

आमासुपक्वमैरय आसूर्यꣳरोहयो दिवि। घर्मन्न सामन्तपता सुवृक्तिभि-जुष्टङ्गिर्वणसे गिरः।

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभि-रर्किणः। इन्द्रँव्वाणीरनूषत।

गायन्तित्वा गायत्रिणोऽर्चन्त्यर्क-मर्किणः। ब्रह्माणस्त्वा शतक्रतवुद्ववꣳ श-मिव येमिरे।

अꣳहोमुचे प्रभरेमा मनीषा-मोषिष्ठ-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दाव्ने सुमतिङ्गृणानाः। इदमिन्द्र प्रतिहव्य-
ङ्गृभाय सत्यास्सन्तु यजमानस्य कामाः।

विवेषयन्मा धिषणा जजान स्तवै पुरा
पार्यादिन्द्रमह्नः। अꣳहसो यत्र पीपरद्यथा
नो नावेव यान्तमुभये हवन्ते।

प्रसम्राजं प्रथममद्ध्वराणामꣳहोमुचँ-
व्वृषभँ-य्यज्ञियानाम्। अपान्नपातमश्विना
हयन्तमस्मिन्नर इन्द्रियन्धत्तमोजः।

विन इन्द्र मृधो जहि नीचा यच्छ
पृतन्यतः। अधस्पदन्तमीङ्कृधियो अस्माꣳ
अभिदासति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रक्षत्रमभिवाममोजोऽजायथा वृषभ चर्षणीनाम्। अपानुदो जनममित्रयन्तमुरुन्देवेभ्यो अकृणोरु लोकम्।

मृगोन भीमः कुचरो गिरिष्ठाः परावत आजगामा परस्याः। सृकꣳसꣳशाय पविमिन्द्रतिग्मँ-व्विशत्रून्ताढि विमृधो नुदस्व।

विशत्रून् विमृधोनुद विवृत्रस्य हनूरुज। विमन्युमिन्द्रभामितोऽमित्रस्याभिदासतः।

त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवे सुहवꣳशूरमिन्द्रम्। हुवे नु शक्रं पुरुहूतमिन्द्रꣳस्वस्ति नो मघवा धात्विन्द्रः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माते अस्या७ सहसावन्परिष्टावघाय भूम हरिवः परादै। त्रायस्वनोऽवृकेभिर्वरूथैस्तव प्रियासस्सूरिषु स्याम।

अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम्। ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्द्धयन्नहये हन्तवा उ।

वृष्णे यत्ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदिति स्सजोषाः। अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून्।

४ यत इन्द्र भयामहे ततो नो अभयङ्कृधि। मघवन्च्छग्धि तव तन्न ऊतये

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्विषो विमृधो जहि।

स्वस्तिदा विशस्पति वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु न-स्स्वस्तिदा अभयङ्करः।

महा७ इन्द्रो वज्रबाहु-ष्षोडशी शर्म यच्छतु। स्वस्ति नो मघवा करोतु हन्तु पाप्मानँय्योऽस्मान्द्वेष्टि।

सजोषा इन्द्र सगणो मरुद्भि-स्सोमं पिब वृत्रहन्च्छूर विद्वान्। जहि शत्रू७ रप-मृधो नुदस्वाथाभयङ्कृणुहि विश्वतो नः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ ये देवाः पुरस्सदोऽग्निनेत्रा दक्षिण-सदो यमनेत्राः पश्चाथ्सद-स्सवितृनेत्रा उत्तरसदो वरुणनेत्रा उपरिषदो बृहस्पति-नेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्य - स्स्वाहाऽग्नये रक्षोघ्ने स्वाहा यमाय सवित्रे वरुणाय बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा।।

६ अग्निरायुष्मान्थ्स वनस्पतिभि-रायुष्मान्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि सोम आयुष्मान्थ्स ओषधीभि र्यज्ञ आयुष्मान्थ्स दक्षिणाभि र्ब्रह्माऽऽयुष्मत्तद्-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणैरायुष्म-द्देवा आयुष्मन्त-स्तेऽमृतेना-ऽऽयुष्मन्त-स्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्-करोमि।।

७ यावामिन्द्रावरुणा यतव्या तनूस्तयेमम७- हसो मुञ्चतँ-य्यावामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूस्तयेमम७-हसो मुञ्चतँ- य्योवामिन्द्रावरुणावग्नौ स्त्रामस्तँव्वामेतेनावयजे यो वामिन्द्रावरुणा द्विपाथ्सु पशुषु चतुष्पाथ्सु गोष्ठे गृहेष्व-प्स्वोषधीषु वनस्पतिषु स्त्रामस्तँव्वामेतेनाव यजे।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५.१ ये देवाः पुरस्सदोऽग्निनेत्रा रक्षोहण-
-स्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्य-
स्स्वाहा।

ये देवा दक्षिणसदो यमनेत्रा रक्षोहण-
स्तेनः पान्तु तेनोऽवन्तु तेभ्योनमस्तेभ्य
स्स्वाहा।

ये देवाः पश्चाथ्सद- स्सवितृनेत्रा
रक्षोहण-स्तेनः पान्तु तेनोऽवन्तु तेभ्यो
नमस्तेभ्य-स्स्वाहा।

येदेवा उत्तरसदो वरुणनेत्रा रक्षोहण-
स्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्य-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्स्वाहा।

ये देवा उपरिषदो बृहस्पतिनेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्य-स्स्वाहा।

अग्नये रक्षोघ्ने स्वाहा।

यमाय रक्षोघ्ने स्वाहा।

सवित्रे रक्षोघ्ने स्वाहा।

वरुणाय रक्षोघ्ने स्वाहा।

बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६.१ अग्निरायुष्मान्थ्स वनस्पतिभि-
रायुष्मान्तेन त्वाऽऽयुषा- ऽऽ युष्मन्तङ्-
करोमि।

सोम आयुष्मान्थ्स ओषधीभिरायुष्मा-
न्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि।

यज्ञ आयुष्मान्थ्स दक्षिणाभिरायुष्मा-
न्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि।

ब्रह्माऽऽयुष्मत्तद् ब्राह्मणैरायुष्मत्तेन
त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि।

देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन
त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७.१ या वामिन्द्रावरुणा यतव्या तनूस्तयेमम ँहसो मुञ्चतम्।

या वामिन्द्रावरुणा सहस्या तनूस्तयेमम ँहसो मुञ्चतम्।

या वामिन्द्रावरुणा रक्षस्या तनूस्तयेमम ँहसो मुञ्चतम्।

या वामिन्द्रावरुणा तेजस्या तनूस्तयेमम ँहसो मुञ्चतम्।

यो वामिन्द्रावरुणावग्नौ स्रामस्तँव्वामेतेनावयजे।

यो वामिन्द्रावरुणा द्विपाथ्सु पशुषु

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्राम॒स्तँ-व्वाम॒तेनाव॑यजे।

यो वा॑मिन्द्रावरुणा॒ चतु॑ष्पाथ्सु॒ (प॒शुषु॒)

स्त्राम॒स्तँ-व्वाम॒तेनाव॑यजे।

यो वा॑मिन्द्रावरुणा गो॒ष्ठे स्त्राम॒स्तँ-

व्वाम॒तेनाव॑यजे।

यो वा॑मिन्द्रावरुणा गृ॒हेषु॒ स्त्राम॒स्तँ-

व्वाम॒तेनाव॑यजे।

यो वा॑मिन्द्रावरुणा॒ऽफ्सु स्त्राम॒स्तँ-

व्वाम॒तेनाव॑यजे।

यो वा॑मिन्द्रावरु॒णौष॑धीषु॒ स्त्राम॒स्तँ-

व्वाम॒तेनाव॑यजे।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो वामिन्द्रावरुणा वनस्पतिषु
स्त्रामस्तँ- व्वामेतेनावयजे।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८ अग्ने यशस्विन् यशसेममर्पये-
न्द्रावती-मपचिती-मिहावह। अयं मूर्द्धा
परमेष्ठी सुवर्चा-स्समानाना-मुत्तमश्लोको
अस्तु।

भद्रं पश्यन्त उपसेदुरग्रे तपो दीक्षा-
मृषय-स्सुवर्विदः। ततः क्षत्रं बलमोजश्च
जातन्तदस्मै देवा अभि सन्नमन्तु।

धाता विधाता परमोत सन्दृक्प्रजापतिः
परमेष्ठी विराजा। स्तोमाश्छन्दा ँसि
निविदो म आहुरेतस्मै राष्ट्रमभि सन्नमाम।

अभ्यावर्तद्ध्वमुपमेत साकमय ँशास्ता

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽधिपतिर्वो अस्तु। अस्य विज्ञानमनु स७रभद्ध्वमिमं पश्चादनुजीवाथ सर्वे।।

९ ऋताषाडृतधामाऽग्नि र्गन्धर्व स्तस्यौषधयोऽफ्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा स७ हितो विश्वसामा सूर्यो गन्धर्व स्तस्य मरीचयोऽफ्सरस आयुव स्सुषुम्नस्सूर्यरश्मि श्चन्द्रमा गन्धर्व स्तस्य नक्षत्राण्यफ्सरसो बेकुरयो भुज्युस्सुपर्णो यज्ञो गन्धर्व स्तस्य दक्षिणा अफ्सरस स्स्तवाः प्रजापति र्विश्वकर्मा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनो गन्धर्व स्तस्यर्क्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गन्धर्व स्तस्यापोऽप्सरसो मुदा भुवनस्य पते यस्य त उपरि गृहा इह च।

सनो रास्वाज्यानि॑ रायस्पोष॑ सुवीर्य॑ सँव्वथ्सरीणा॑ स्वस्तिम्।

परमेष्ठ्यधिपति र्मृत्यु र्गन्धर्व स्तस्य विश्वमप्सरसो भुव - स्सुक्षितिस्सुभूति र्भद्रकृथ्सुवर्वान्पर्जन्यो गन्धर्व स्तस्य विद्युतोऽप्सरसो रुचो - दूरेहेतिरमृडयो मृत्युर्गन्धर्व स्तस्यप्रजा अप्सरसो भीरुवः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चारुःकृपणकाशी कामो गन्धर्वस्तस्याधयो ऽप्सरस श्शोचयन्ती र्नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्य स्स्वाहा स नो भुवनस्य पते यस्य त उपरि गृहा इह च। उरुब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

९.१ १. ऋतुषाडृतधामाऽग्नि र्गन्धर्वस्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

२. सꣳहितो विश्वसामा सूर्यो गन्धर्वस्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

तस्य मरीचयोऽप्सरस आयुवो नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

३. सुषुम्न स्सूर्यरश्मि श्चन्द्रमा गन्धर्वस्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

तस्य नक्षत्राण्यप्सरसो बेकुरयो नाम

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

४. भुज्युस्सुपर्णो यज्ञो गन्धर्व स्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

तस्य दक्षिणा अफ्सरसः स्तवा नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

५. प्रजापति र्विश्वकर्मा मनो गन्धर्व स्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

तस्यर्क्सामान्यफ्सरसो वह्नयो नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

६. इषिरो विश्वव्यचा वातो गन्धर्वस्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यापोऽफ्सरसो मुदा नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

७. भुवनस्य पते यस्य त उपरि गृहा इह च। सनो रास्वाज्यानि ँ रायस्पोष ँ सुवीर्य ँ सँव्वथ्सरीणा ँ स्वस्ति ँ स्वाहा।।

८. परमेष्ठ्यधिपति मृत्यु र्गन्धर्वस्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

तस्य विश्वमफ्सरसो भुवो नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

९. सुक्षितिस्सुभूतिर्भद्रकृत्सुवर्वान् पर्जन्यो गन्धर्व-स्सइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य विद्युतोऽफ्सरसो रुचो नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

१०. दूरेहेतिरमृडयो मृत्युर्गन्धर्वस्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा ।

तस्य प्रजा अफ्सरसो भीरुवो नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्यस्स्वाहा।।

११. चारुः कृपणकाशी कामो गन्धर्वस्स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।

तस्याधयोऽफ्सरस श्शोचयन्ती र्नाम ता इदं ब्रह्मक्षत्रं पान्तु ताभ्य स्स्वाहा।।

१२. सनो भुवनस्यपते यस्यत उपरि गृहा इह च। उरुब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

९.२ १. ऋतुषाडृतधामाऽग्निर्गन्धर्व स्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

२. सꣳहितो विश्वसामा सूर्यो गन्धर्व स्तस्य मरीचयोऽप्सरस आयुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

३. सुषुम्नस्सूर्यरश्मि श्चन्द्रमा गन्धर्व स्तस्य नक्षत्राण्यप्सरसो बेकुरयो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मै स्वाहा ताभ्यस्स्वाहा।।

४. भुज्युस्सुपर्णो यज्ञो गन्धर्व स्तस्य दक्षिणा अप्सरसः स्तवा नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

५. प्रजापति र्विश्वकर्मा मनो गन्धर्व-स्तस्यर्क्सामान्यप्सरसो वह्नयो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽफ्सरसो मुदा नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

७. भुवनस्य पते यस्य त उपरि गृहा इह च। सनो रास्वाज्यानि ँ रायस्पोष ँ सुवीर्य ँ सँव्वथ्सरीणा ँ स्वस्तिम्।।

८. परमेष्ठ्यधिपति र्मृत्यु र्गन्धर्वस्तस्य विश्वमफ्सरसो भुवो नाम स इदं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

९. सुक्षिति स्सुभूति र्भद्रकृत्सुवर्वान् पर्जन्यो गन्धर्व स्तस्य विद्युतोऽफ्सरसो रुचो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

१०. दूरेहेतिरमृडयो मृत्यु र्गन्धर्वस्तस्य प्रजा अफ्सरसो भीरुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

११. चारुः कृपणकाशी कामो गन्धर्व-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तस्याधयोऽफ्सरस श्शोचयन्तीर्नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा।।

१२. स नो भुवनस्य पते यस्य त उपरि गृहा इह च। उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१० नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमः।।

येऽदो रोचने दिवो येवा सूर्यस्य रश्मिषु। येषामप्सुसदः कृतन्तेभ्यस्सर्पेभ्यो नमः।

या इषवो यातुधानानाँय्ये वा वनस्पतीँरनु। ये वाऽवटेषु शेरते तेभ्यस्सर्पेभ्यो नमः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

११ अयं पुरो हरिकेश स्सूर्यरश्मि स्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थलाच कृतस्थलाचाप्सरसौ यातुधाना हेती रक्षाꣳसि प्रहेतिरयन्दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानिग्रामण्यौ मेनकाच सहजन्याचाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरयं पश्चाद्विश्वव्यचा स्तस्य रथप्रोतश्चासमरथश्च सेनानिग्रामण्यौ प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ सर्पा हेतिर्व्याघ्राः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रहेति-

रयमुत्तराथ्सँय्यद्वसु स्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाफ्सरसावापो हेति वातः प्रहेति-

रयमुपर्यर्वाग्वसु स्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाफ्सरसौ विद्युद्धेतिरवस्फूर्जन्-प्रहेति स्तेभ्यो नमस्ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

११.१ अयं पुरो हरिकेश स्सूर्यरश्मि स्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थलाच कृतस्थला चाप्सरसौ यातुधाना हेती रक्षाꣳ सि प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि।।

अयन्दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानिग्रामण्यौ मेनका च सहजन्या चाप्सरसौ दङ्क्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेति स्तेभ्यो नमस्ते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि।।

अयं पश्चाद्विश्वव्यचा स्तस्य रथप्रोतश्चासमरथश्च सेनानिग्रामण्यौ प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ सर्पा हेतिर्व्याघ्राः प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि।।

अयमुत्तराथ्सँय्यद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेति-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तेभ्यो नमस्ते नो मृडयन्तु ते यन्द्विष्मो
यश्च नो द्वेष्टि तँव्वो जम्भे दधामि।।

अयमुपर्यर्वाग्वसु स्तस्य तार्क्ष्य-
श्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च
पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन्
प्रहेति स्तेभ्यो नमस्ते नो मृडयन्तु ते
यन्द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे
दधामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२ आशुश्शिशानो वृषभो न युद्ध्मो घनाघनः क्षोभण श्चर्षणीनाम्। सङ्क्रन्दनोऽनिमिष एकवीर श्शतꣳ सेना अजयथ्साकमिन्द्रः।

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तथ्सहद्ध्वँय्युधो नर इषुहस्तेन वृष्णा।।

स इषुहस्तै स्सनिषङ्गिभि र्वशी सꣳस्रष्टा सयुध इन्द्रो गणेन। सꣳसृष्ट-जिथ्सोमपा बाहुशद्ध्र्यूद्ध्र्वधन्वा प्रतिहिता-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिरस्ता।

बृहस्पते परिदीया रथेन रक्षोहाऽमित्राँ अपबाधमानः। प्रभञ्जन्त्सेनाः प्रमृणोयुधा जयन्नस्माकमेद्ध्यविता रथानाम्।

गोत्रभिदङ्गोविदँव्वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा। इमँ सजाता अनुवीरयद्ध्वमिन्द्रँ सखायोऽनु सँरभद्ध्वम्।

बलविज्ञाय स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः। अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोविद्।

अभिगोत्राणि सहसा गाहमानोऽदायो वीर

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्शतमन्युरिन्द्रः। दुश्च्यवनःपृतनाषाड-
युद्ध्योऽस्माकꣳ सेना अवतु प्रयुत्सु।

इन्द्र आसान्नेता बृहस्पति र्दक्षिणा यज्ञः
पुर एतु सोमः। देवसेनाना- मभिभञ्जतीना-
ञ्जयन्तीनां मरुतो यन्त्वग्रे।

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां
मरुताꣳशर्द्ध उग्रम्। महामनसां भुवन-
च्यवानां घोषो देवाना- ञ्जयतामुदस्थात्।

अस्माकमिन्द्र स्समृतेषुद्ध्वजेष्वस्माकँ-
य्या इषवस्ता जयन्तु। अस्माकँव्वीरा उत्तरे
भवन्त्वस्मानु देवा अवता हवेषु।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां महाꣳसि। उद्वृत्रहन्वाजिनाँ-व्वाजिना- न्युद्रथानाञ्जयतामेतु घोषः।

उपप्रेत जयता नरस्स्थिरा वस्सन्तु बाहवः। इन्द्रो व श्शर्म यच्छत्वनाधृष्या यथाऽसथ।

अवसृष्टा परापत शरव्ये ब्रह्मसꣳशिता। गच्छामित्रान्प्रविश मैषाङ्कञ्चनोच्छिषः।

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम्। उरोर्वरीयो वरिवस्ते अस्तु जयन्तन्त्वामनु मदन्तु देवाः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र बाणास्संपतन्ति कुमारा विशिखा इव। इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु।।

१३ शञ्च मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रञ्च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणञ्च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वञ्च मे महश्च मे सँविच्च मे ज्ञात्रञ्च मे सूश्च मे प्रसूश्च मे सीरञ्च मे लयश्च म ऋतञ्च मेऽमृतञ्च मेऽयक्ष्मञ्च मेऽनामयच्च मे जीवातुश्च मे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घायुत्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे सुगञ्च मे शयनञ्च मे सूषा च मे सुदिनञ्च मे।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४ ममाग्ने वर्चो विहवेष्वस्तु वयन्त्वे-
न्धानास्तनुवं पुषेम। मह्यन्नमन्तां प्रदिश-
श्चतस्र स्त्वयाद्ध्यक्षेण पृतना जयेम।

मम देवा विहवे सन्तु सर्व इन्द्रावन्तो
मरुतो विष्णुरग्निः। ममान्तरिक्षमुरु गोप-
मस्तु मह्यँव्वातः पवताङ्कामे अस्मिन्।

मयि देवा द्रविणमायजन्तां मय्याशी-
रस्तु मयिदेवहूतिः। दैव्या होतारा वनिषन्त
पूर्वेऽरिष्टास्स्याम तनुवा सुवीराः।

मह्यँय्यजन्तु मम यानि हव्याऽऽकूति
स्सत्या मनसो मे अस्तु। एनो मा नि गा-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ङ्कतमच्चनाहँ व्विश्वेदेवासो अधिवोचता मे।

देवीष्षडुर्वीरुरुणः कृणोत विश्वेदेवास इह वीरयद्ध्वम्। मा हास्महि प्रजया मा तनूभिर्मा रधामद्विषते सोमराजन्।

अग्निर्मन्युं प्रतिनुदन्पुरस्तादददब्धो गोपाः परिपाहि नस्त्वम्। प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषाञ्चित्तं प्रबुधाविनेशत्।

धाता धातृणां भुवनस्य यस्पतिर्देवꣳ सवितारमभिमातिषाहम्। इमँय्यज्ञमश्विनो-भा बृहस्पतिर्देवाः पान्तु यजमानन्न्यर्थात्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उरुव्यचा नो महिषश्शर्म यꣳ सदस्मिन् हवे पुरुहूतः पुरुक्षु। स नः प्रजायै हर्यश्व मृडयेन्द्र मानो रीरिषो मापरादाः।

येनस्सपत्ना अपते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान्। वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रञ्चेत्तारमधिराजमक्रन्न्।

अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः। इमन्नो यज्ञँव्विहवे जुषस्वास्य कुर्मो हरिवो मेदिनन्त्वा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५ अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहव स्समिन्धते। विश्वस्याँ-व्विशि प्रविविशिवाꣳ समीमहे स नो मुञ्चत्वꣳहसः।

यस्येदं प्राणन्निमिषद्यदेजति यस्य जात-ञ्जनमानञ्च केवलम्। स्तौम्यग्निन्नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः।

इन्द्रस्य मन्वे प्रथमस्य प्रचेतसो वृत्रघ्न स्तोमा उप मामुपागुः। यो दाशुषस्सुकृतो हवमुपगन्ता स नो मुञ्चत्वꣳहसः।

यस्सङ्ग्रामन्नयति सँव्वशीयुधे यः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्टानि स७ सृजति त्रयाणि। स्तौमीन्द्र-
न्नाथितो जोहवीमि स नो मुञ्चत्व७हसः।

मन्वेवां मित्रावरुणा तस्य वित्त७
सत्यौजसा दृ७हणा यन्नुदेथे। या राजान७
सरथँय्याथ उग्रा तानो मुञ्चतमागसः।

यो वा७ रथ ऋजुरश्मि स्सत्यधर्मा
मिथुश्चरन्तमुपयाति दूषयन्न्। स्तौमि
मित्रावरुणा नाथितो जोहवीमि तौ नो
मुञ्चतमागसः।

वायोस्सवितु र्विदथानि मन्महे
यावात्मन्वद् बिभृतो यौ च रक्षतः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यौ विश्वस्य परिभूबभूवतु स्तौनो मुञ्चत-
मागसः।

उपश्रेष्ठान आशिषो देवयो र्धर्मे
अस्थिरन्। स्तौमि वायु७ सवितारन्नाथितो
जोहवीमि तौ नो मुञ्चतमागसः।

रथीतमौरथीनामहव ऊतये शुभङ्-
गमिष्ठौ सुयमेभिरश्वैः। ययोर्वान्देवौ देवे-
ष्वनिशितमोजस्तौ नो मुञ्चतमागसः।

यदयातँव्वहतु७ सूर्यायास्त्रिचक्रेण
स७ सदमिच्छमानौ। स्तौमि देवावश्विनौ
नाथितो जोहवीमि तौनो मुञ्चतमागसः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुतांमन्वे अधिनो ब्रुवन्तु प्रेमाँव्वाचँ-
व्विश्वामवन्तु विश्वे। आशून् हुवे सुयमा-
नूतये तेनो मुञ्चन्त्वेनसः।

तिग्ममायुधँव्वीडित ७ सहस्वद्दिव्य ७
शर्द्धः पृतनासु जिष्णु। स्तौमि देवान्मरुतो
नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः।

देवानां मन्वे अधिनोब्रुवन्तु प्रेमाँव्वाचँ-
व्विश्वामवन्तु विश्वे। आशून् हुवे सुयमा-
नूतये तेनो मुञ्चन्त्वेनसः।

यदिदं माऽभिशोचति पौरुषेयेण
दैव्येन। स्तौमि विश्वान्देवान्नाथितो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जोहवीमि ते नो मुञ्चन्त्वेनसः।

*अनुनोऽद्यानुमतिरन्विदनुमते त्वं-

वैश्वानरो न ऊत्या पृष्टो दिवि।

*[अनुनोऽद्यानुमति यज्ञन्देवेषु-

मन्यताम्। अग्निश्च हव्यवाहनो भवता-

न्दाशुषे मयः।

अन्विदनुमते त्वं मन्यासै शञ्चनः

कृधि। क्रत्वे दक्षाय नोहिनु प्रण आयूंषि

तारिषः।

वैश्वानरो न ऊत्याऽऽप्रयातु परावतः।

अग्निरुक्थेन वाहसा। पृष्टो दिविपृष्टो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा-
विवेश। वैश्वानरस्सहसा पृष्टो अग्निस्सनो
दिवा सरिषः पातु नक्तम्।।]

ये अप्रतेथाममितेभिरोजोभि र्ये प्रतिष्ठे
अभवताँव्वसूनाम्। स्तौमि द्यावापृथिवी
नाथितो जोहवीमि तेनो मुञ्चतम ँ हसः।

उर्वीरोदसी वरिवः कृणोतङ्क्षेत्रस्य
पत्नी अधिनोब्रूयातम्। स्तौमि द्यावापृथिवी
नाथितो जोहवीमि तेनो मुञ्चतम ँ हसः।

यत्ते वयं पुरुषत्रायविष्ठाविद्वा ँ स-
श्चकृमा कच्चनागः। कृधीस्वस्मा ँ अदिते-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

-रनागा व्येना ँ सि शिश्रथो विष्वगग्ने।
यथा हतद्वसवो गौर्यं चित्पदिषितामुञ्चता
यजत्राः। एवात्वमस्मत्प्रमुञ्चा व्य ँ हः
प्रतार्यग्ने प्रतरान्न आयुः।।

१६ समीची नामासि प्राची-
दिक्तस्यास्तेऽग्निरधिपतिरसितो रक्षिता
यश्चाधिपति र्यश्च गोप्ता ताभ्यान्नमस्तौनो
मृडयतान्ते यन्द्विष्मो यश्चनो द्वेष्टि तँव्वा-
ञ्जम्भे दधाम्यो- जस्विनी नामासि दक्षिणा
दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकुः-
प्राची नामासि प्रतीची दिक्तस्यास्ते सोमो-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽधिपति स्स्वजो- ऽवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणोऽधिपति स्तिरश्चराजिर- धिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पतिरधिपतिश्श्वित्रो- वशिनी नामासीय न्दिक्तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्या- न्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वाञ्जम्भे दधामि।

१७ हेतयो नामस्थ तेषाँव्वः पुरोगृहा अग्निर्व इषव स्सलिलो- निलिंपा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामस्थ तेषाँव्वो दक्षिणागृहाः पितरो व इषवस्सगरो- वज्रिणो नामस्थ तेषाँव्वः पश्चाद्गृहा स्स्वप्नो व इषवो गह्वरो- ऽवस्थावानो नामस्थ तेषाँव्व उत्तराद्गृहा आपो व इषवस्समुद्रो- ऽधिपतयो नामस्थ तेषाँव्व उपरिगृहा वर्षँव्व इषवोऽवस्वान्- क्रव्या नामस्थ पार्थिवास्तेषाँव्व इहगृहा अन्नँव्व इषवो निमिषो वात नामन्तेभ्यो वो नमस्तेनो मृडयत ते यन्द्विष्मो यश्चनो द्वेष्टि तँव्वो जम्भे दधामि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१६.१ समीची नामासि प्राची-दिक्तस्यास्तेऽग्निरधिपतिरसितो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यान्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्चनो द्वेष्टि तँव्वाञ्जम्भे दधामि।

ओजस्विनी नामासि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकू रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यान्नमस्तौनो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वाञ्जम्भे दधामि।

प्राची नामासि प्रतीची दिक्तस्यास्ते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमोऽधिपति स्स्वजो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यान्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वाञ्जम्भे दधामि।

अवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणोऽधिपति स्तिरश्चराजी रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यान्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वाञ्जम्भे दधामि।

अधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पतिरधिपति श्श्वित्रो रक्षिता यश्चाधि-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पति र्यश्च गोप्ता ताभ्यान्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वाञ्जम्भे दधामि।

वशिनी नामासीयन्दित्तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यान्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वाञ्जम्भे दधामि।

१७.१ हेतयो नामस्थ तेषाँव्वः पुरोगृहा अग्निर्व इषवस्सलिलो वात नामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यश्चनो द्वेष्टि तँव्वो जम्भे दधामि।

निलिंपा नामस्थ तेषाँव्वो दक्षिणागृहाः पितरो व इषवस्सगरो वातनामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्चनो द्वेष्टि तँव्वो जम्भे दधामि।

वज्रिणो नामस्थ तेषाँव्वः पश्चाद्गृहा स्स्वप्नो व इषवो गह्वरो वातनामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्चनो द्वेष्टि तँव्वो जम्भे दधामि।

अवस्थावानो नामस्थ तेषाँव्व उत्तराद्-गृहा आपो व इषवस्समुद्रो वातनामन्तेभ्यो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्चनो द्वेष्टि तँव्वो जम्भे दधामि।

अधिपतयो नामस्थ तेषाँव्व उपरिगृहा वर्षँव्व इषवोऽवस्वान् वातनामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्चनो द्वेष्टि तँव्वो जम्भे दधामि।

क्रव्या नामस्थ पार्थिवास्तेषाँव्व इहगृहा अन्नँव्व इषवो निमिषो वातनामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८ शतायुधाय शतवीर्याय शतोतयेऽभि मातिषाहे। शतँय्योनश्शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा।

ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति। तेषाँय्यो अज्यानि-मजीतिमावहात्तस्मै नो देवाः परिदत्तेह सर्वे।

ग्रीष्मो हेमन्त उत नो वसन्तश्शरद्वर्षा स्सुवितन्नो अस्तु। तेषामृतूना७ शतशारदा-नान्निवात एषामभये स्याम।

इदुवथ्सराय परिवथ्सराय सँव्वथ्सराय

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृणुता बृहन्नमः। तेषां वयꣳसुमतौ यज्ञियानाञ्ज्योगजीता अहतास्स्याम।

भद्रान्नश्श्रेय स्समनैष्ट देवास्त्वयाऽवसेन समशीमहित्वा। स नो मयोभूः पितो आविशस्व शन्तोकाय तनुवे स्योनः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९ भूतं भव्यं भविष्यद्वषट्थ्स्वाहा नम

ऋक्साम यजुर्वषट्थ्स्वाहा नमो

गायत्री त्रिष्टुब्जगती वषट्थ्स्वाहा नमः

पृथिव्यन्तरिक्षन्द्यौ र्वषट्थ्स्वाहा नमो

ऽग्निर्वायुस्सूर्यो वषट्थ्स्वाहा नमः

प्राणो व्यानोऽपानो वषट्थ्स्वाहा नमो

ऽन्नङ्कृषि-र्वृष्टि-र्वषट्थ्स्वाहा नमः

पिता पुत्रः पौत्रो वषट्थ्स्वाहा नमो

भूर्भुवस्सुव-र्वषट्थ्स्वाहा नमः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२० इन्द्रो दधीचो अस्थभिः। वृत्राण्य-
प्रतिष्कुतः। जघान नवतीर्नव।

इच्छन्नश्वस्य यच्छिरः। पर्वतेष्वपश्रितम्।
। तद्विदच्छर्यणावति।

अत्राहगोरमन्वत। नाम त्वष्टुरपीच्यम्।
इत्था चन्द्रमसो गृहे।

इन्द्रमिद्गाथिनो बृहत्। इन्द्रमर्केभिरर्किणः।
इन्द्रँव्वाणीरनूषत।

इन्द्र इद्धर्योस्सचा। संमिश्ल आवचोयुजा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रो वज्री हिरण्ययः।

इन्द्रो दीर्घाय चक्षसे। आसूर्यꣳ रोहय-

द्दिवि। विगोभिरद्रिमैरयत्।

इन्द्र वाजेषु नो अव। सहस्रप्रधनेषु च।

उग्र उग्राभिरूतिभिः।

तमिन्द्रँव्वाजयामसि। महे वृत्राय हन्तवे

सवृषा वृषभोभुवत्।

इन्द्रस्स दामने कृतः। ओजिष्ठस्स बले

हितः। द्युम्नी श्लोकी स सोम्यः।

गिरा वज्रो न सम्भृतः। स बलो

अनपच्युतः। ववक्षुरुग्रो अस्तृतः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२१ चक्षुषो हेते मनसो हेते। वाचो हेते ब्रह्मणो हेते। यो माऽघायुरभिदासति। तमग्ने मेन्याऽमेनिङ्कृणु।

यो मा चक्षुषा यो मनसा। यो वाचा ब्रह्मणाऽघायुरभिदासति। तयाऽग्ने त्वं मेन्या। अमुममेनिङ्कृणु।

यत्किञ्चासौ मनसा यच्च वाचा। यज्ञैर्जुहोति यजुषा हविर्भिः। तन्मृत्यु- र्निर्ऋत्या सँव्विदानः। पुरादिष्टादाहुतीरस्य हन्तु।

यातुधाना निर्ऋतिरादु रक्षः। ते अस्य घ्नन्त्वनृतेन सत्यम्। इन्द्रेषिता आज्यमस्य

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मथ्नन्तु। मातथ्समृद्धियदसौ करोति।

हन्मि तेऽहं कृतꣳ हविः। यो मे घोरमचीकृतः। अपाञ्चौ त उभौ बाहू। अपनह्याम्यास्यम्।

अपनह्यामि ते बाहू। अपनह्याम्यास्यम्। अग्नेर्देवस्य ब्रह्मणा। सर्वन्तेऽवधिषङ्कृतम्।

पुराऽमुष्य वषट्कारात्। यज्ञन्देवेषु नस्कृधि। स्विष्टमस्माकं भूयात्। माऽस्मान्प्रापन्नरातयः।

अन्ति दूरे सतो अग्ने। भ्रातृव्यस्याभिदासतः। वषट्कारेण वज्रेण। कृत्याꣳ हन्मि

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृताम्हम् ।

यो मा नक्तं दिवा सायम्। प्रातश्चाह्नो निपीयति। अद्यातमिन्द्र वज्रेण। भ्रातृव्यं पादयामसि।।

२२ प्राणो रक्षति विश्वमेजत्। इर्यो भूत्वा बहुधा बहूनि। स इथ्सर्वँव्यानशे।

यो देवो देवेषु विभूरन्तः। आवृदूदात् क्षेत्रियद्ध्वगद्वृषा। तमित्प्राणं मनसोपशिक्षत। अग्रन्देवानामिदमत्तु नो हविः।

मनसश्चित्तेदम्। भूतं भव्यञ्च गुप्यते। तद्धि देवेष्वग्रियम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आ न एतु पुरश्चरम्। सह देवैरिमꣳ हवम्। मनश्श्रेयसि श्रेयसि। कर्मन् यज्ञपतिन्दधत्।

जुषतां मे वागिदꣳ हविः। विराड्देवी पुरोहिता। हव्यवाडनपायिनी।

यया रूपाणि बहुधा वदन्ति। पेशाꣳसि देवाः परमे जनित्रे। सा नो विराडनपस्फुरन्ती। वाग्देवी जुषतामिदꣳ हविः।

चक्षुर्देवाना-ञ्ज्योतिरमृते न्यक्तम्। अस्य विज्ञानाय बहुधा निधीयते। तस्य सुम्नमशीमहि। मा नो हासीद्विचक्षणम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुरिन्नः प्रतीर्यताम्। अनन्धाश्चक्षुषा वयम्। जीवा ज्योतिरशीमहि। सुवर्ज्योतिरुतामृतम्।

श्रोत्रेण भद्रमुत शृण्वन्ति सत्यम्। श्रोत्रेण वाचं बहुधोद्यमानाम्। श्रोत्रेण मोदश्च महश्च श्रूयते। श्रोत्रेण सर्वा दिश आशृणोमि।

येन प्राच्या उत दक्षिणा। प्रतीच्यै दिशश्शृण्वन्त्युत्तरात्। तदिच्छ्रोत्रं बहुधोद्यमानम्। अरान्न नेमिः परि सर्वं बभूव।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३ सिँहे व्याघ्र उतयापृदाकौ। त्विषिरग्नौ ब्राह्मणे सूर्ये या। इन्द्रँय्या देवी सुभगा जजान। सा न आगन्वर्चसा सँव्विदाना।

या राजन्ये दुन्दुभावायतायाम्। अश्वस्य क्रन्द्ये पुरुषस्य मायौ। इन्द्रँय्या देवी सुभगा जजाना। सा न आगन्वर्चसा सँव्विदाना।

या हस्तिनि द्वीपिनि या हिरण्ये। त्विषिरश्वेषु पुरुषेषु गोषु। इन्द्रँय्या देवी सुभगा जजान। सा न आगन्वर्चसा सँव्विदाना।

रथे अक्षेषु वृषभस्य वाजे। वाते पर्जन्ये वरुणस्य शुष्मे। इन्द्रँय्यादेवी सुभगा जजान।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा न आगन्वर्चसा सँव्विदाना।

राडसि विराडसि। सम्राडसि स्वराडसि।

इन्द्राय त्वा तेजस्वते तेजस्वन्तꣳ श्रीणामि। इन्द्राय त्वौजस्वत ओजस्वन्तꣳ श्रीणामि। इन्द्राय त्वा पयस्वते पयस्वन्तꣳ श्रीणामि। इन्द्राय त्वाऽऽयुष्मत आयुष्मन्तꣳ श्रीणामि।

तेजोऽसि। तत्ते प्रयच्छामि। तेजस्वदस्तु मे मुखम्। तेजस्वच्छिरो अस्तु मे। तेजस्वान् विश्वतः प्रत्यङ्ङ्। तेजसा संपिपृग्धि मा।

ओजोऽसि। तत्तेप्रयच्छामि। ओजस्वदस्तु

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मे मुखम्। ओजस्वच्छिरो अस्तु मे। ओजस्वान् विश्वतः प्रत्यङ्ङ्। ओजसा संपिपृग्धि मा।

पयोऽसि। तत्तेप्रयच्छामि। पयस्वदस्तु मे मुखम्। पयस्वच्छिरो अस्तु मे। पयस्वान् विश्वतः प्रत्यङ्ङ्। पयसा संपिपृग्धि मा।

आयुरसि। तत्ते प्रयच्छामि। आयुष्मदस्तु मे मुखम्। आयुष्मच्छिरो अस्तु मे। आयुष्मान् विश्वतः प्रत्यङ्ङ्। आयुषा संपिपृग्धि मा।

इममग्न आयुषे वर्चसे कृधि। प्रियꣳरेतो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरुण सोम राजन्। मातेवास्मा अदिते शर्म यच्छ। विश्वेदेवा जरदष्टि-र्यथाऽसत्।

आयुरसि विश्वायुरसि। सर्वायुरसि सर्वमायुरसि।

यतो वातो मनोजवाः। यतः क्षरन्ति सिन्धवः। तासान्त्वा सर्वासाꣳ रुचा। अभिषिञ्चामि वर्चसा।

समुद्र इवासि गह्मना। सोम इवास्यदाभ्यः। अग्निरिव विश्वतः प्रत्यङ्ङ्। सूर्य इव ज्योतिषा विभूः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपाँय्यो द्रवणे रसः। तमहमस्मा आमुष्यायणाय। तेजसे ब्रह्मवर्चसाय गृह्णामि।

अपाँय्य ऊर्मौ रसः। तमहमस्मा आमुष्यायणाय। ओजसे वीर्याय गृह्णामि।

अपाँय्यो मद्ध्यतो रसः। तमहमस्मा आमुष्यायणाय। पुष्ट्यै प्रजननाय गृह्णामि।

अपाँय्यो यज्ञियो रसः। तमहमस्मा आमुष्यायणाय। आयुषे दीर्घायुत्वाय गृह्णामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४ अहमस्मि प्रथमजा ऋतस्य। पूर्वन्देवेभ्यो अमृतस्य नाभिः। यो मा ददाति स इदेवमावाः। अहमन्न-मन्न-मदन्त-मद्मि।

पूर्वमग्नेरपिदहत्यन्नम्। यत्तौहासाते अह-मुत्तरेषु। व्यात्तमस्य पशव स्सुजम्भम्। पश्यन्ति धीराः प्रचरन्ति पाकाः।

जहाम्यन्यन्नजहाम्यन्यम्। अहमन्नँव्वश-मिच्चरामि। समानमर्थं पर्येमि भुञ्जत्। को मामन्नं मनुष्योदयेत।

पराके अन्नन्निहितँल्लोक एतत्। विश्वैर्देवैः पितृभि र्गुप्तमन्नम्। यदद्यते लुप्यते यत्-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परोप्यते। शततमीसा तनूर्मे बभूव।

महान्तौ चरू सकृद्दुग्धेन पप्रौ। दिवञ्च पृश्निं पृथिवीञ्च साकम्। तथ्संपिबन्तो नमिनन्ति वेधसः। नैतद्भूयो भवति नो कनीयः।

अन्नं प्राणमन्नमपानमाहुः। अन्नं मृत्युन्तमु जीवातुमाहुः। अन्नं ब्रह्माणो जरसँव्वदन्ति। अन्नमाहुः प्रजननं प्रजानाम्।

मोघमन्नँव्विन्दते अप्रचेताः। सत्यं ब्रवीमि वध इथ्सतस्य। नार्यमणं पुष्यति नो सखायम्। केवलाघो भवति केवलादी।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं मेघस्तनयन्वर्षन्नस्मि। मामदन्त्यह-मद्म्यन्यान्। अहꣳ सदमृतो भवामि। मदादित्या अधि सर्वे तपन्ति।

*देवीँव्वाचमजनयन्त यद्वाग्वदन्ति।।

*[देवीँव्वाचमजनयन्त देवाः। ताँव्विश्वरूपाः पशवो वदन्ति। सानो मन्द्रेष-मूर्जन्दुहाना। धेनुर्वागस्मानुपसुष्टुतैतु।।

*यद्वाग्वदन्त्यविचेतनानि। राष्ट्री देवाना-न्निषसादमन्द्रा। चतस्र ऊर्जन्दुदुहे पयाꣳसि। क्वस्विदस्याः परमञ्जगाम।।]

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्तामन्तादधि निर्मितां महीम्। यस्यान्देवा अदधुर्भोजनानि। एकाक्षरान्द्विपदाऽ षट्पदाञ्च। वाचन्देवा उपजीवन्ति विश्वे।

वाचन्देवा उपजीवन्ति विश्वे। वाचङ्गन्धर्वाः पशवो मनुष्याः। वाचीमा विश्वा भुवनान्यर्पिता। सा नो हवञ्जुषतामिन्द्रपत्नी।

वागक्षरं प्रथमजा ऋतस्य। वेदानां माताऽमृतस्य नाभिः। सा नो जुषाणोप यज्ञमागात्। अवन्ती देवी सुहवा मे अस्तु।

यामृषयो मन्त्रकृतो मनीषिणः। अन्वैच्छन्देवा स्तपसा श्रमेण। तान्देवीव्वाचऽहविषा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यजामहे। सा नो दधातु सुकृतस्य लोके।

चत्वारि वाक्परिमिता पदानि। तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति। तुरीयँव्वाचो मनुष्या वदन्ति।।

श्रद्धयाऽग्नि स्समिद्ध्यते। श्रद्धया विन्दते हविः। श्रद्धां भगस्य मूर्द्धनि। वचसा वेदयामसि।

प्रियꣳ श्रद्धेददतः। प्रियꣳ श्रद्धेदिदासतः। प्रियं भोजेषु यज्वसु। इदं म उदितङ्कृधि।

यथा देवा असुरेषु। श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वसु। अस्माकमुदितङ्कृधि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धान्देवा यजमानाः। वायुगोपा उपासते। श्रद्धा ँ हृदय्ययाऽऽकूत्या। श्रद्धया हूयते हविः।

श्रद्धां प्रातर्हवामहे। श्रद्धांमद्ध्यन्दिनं परि। श्रद्धा ँ सूर्यस्य निम्रुचि। श्रद्धे श्रद्धापयेह मा।

श्रद्धा देवानधिवस्ते। श्रद्धा विश्वमिदज्जगत्। श्रद्धाङ्कामस्य मातरम्। हविषा वर्द्धयामसि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मजज्ञानं प्रथमं पुरस्तात्। विसीमत स्सुरुचो वेन आवः। स बुद्ध्निया उपमा अस्य विष्ठाः। सतश्च योनिमसतश्च विवः।

पिता विराजामृषभो रयीणाम्। अन्तरिक्षँ-व्विश्वरूप आविवेश। तमर्कैरभ्यर्चन्ति वत्सम्। ब्रह्मसन्तं ब्रह्मणा वर्द्धयन्तः।

ब्रह्म देवानजनयत्। ब्रह्म विश्वमिद-ञ्जगत्। ब्रह्मणः क्षत्रन्निर्मितम्। ब्रह्म ब्राह्मण आत्मना।

अन्तरस्मिन्निमे लोकाः। अन्तर्विश्व-मिदञ्जगत्। ब्रह्मैव भूतानाञ्ज्येष्ठम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन॒ कोऽर्हति॒ स्पर्द्धितुम्।

ब्रह्मन्दे॒वास्त्रयस्त्रिꣳ शत्। ब्रह्मन्निन्द्र प्रजापती। ब्रह्मन् ह॒ विश्वा॑ भू॒तानि॑। ना॒वीवा॒न्त स्स॒माहि॑ता।

चत॑स्र॒ आशाः॒ प्रच॑रन्त्व॒ग्नयः॑। इ॒मन्नो॑ य॒ज्ञ न्न॑यतु प्रजा॒नन्न्। घृ॒तं पिन्व॑न्न॒जरꣳ सु॒वीर॑म्। ब्रह्म॑ स॒मिद्भ॑व॒त्याहु॑तीनाम्।।

आगावो॑ अग्मन्नु॒त भ॒द्रम॑क्रन्न्। सीद॑न्तु गो॒ष्ठे र॒णय॑न्त्व॒स्मे। प्र॒जाव॑तीः पुरु॒रूपा॑ इ॒ह स्युः। इन्द्रा॑य पू॒र्वीरु॒षसो॒ दुहा॑नाः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रो यज्वने पृणते च शिक्षति। उपेद्ददाति न स्वं मुषायति। भूयोभूयो रयिमिदस्य वर्द्धयन्। अभिन्नेखिल्ले निदधाति देवयुम्।

*नतानशन्ति नता अर्वा।।

*[नतानशन्ति नदभाति तस्करः। नैनो अमित्रो व्यथि रादधर्षति। देवाꣳश्च याभि-र्यजते ददाति च। ज्योगित्ताभि स्सचते गोपति-स्सह।

नता अर्वा रेणुककाटो अश्नुते। न सꣳस्कृतत्रमुपयन्ति ता अभि। उरुगायमभय-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्तस्य ता अनु। गावो मर्त्यस्य विचरन्ति यज्वनः।]

गावो भगो गाव इन्द्रो मे अच्छात्। गावस्सोमस्य प्रथमस्य भक्षः। इमायागावस्स्जनास इन्द्रः। इच्छामीद्धृदा मनसा चिदिन्द्रम्।

यूयङ्गावो मेदयथा कृशञ्चित्। अश्लीलञ्चित्कृणुथा सुप्रतीकम्। भद्रङ्गृहङ्कृणुथ भद्रवाचः। बृहद्वो वय उच्यते सभासु।

प्रजावती स्सूयवसꣳरिशन्तीः। शुद्धा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप स्सुप्रपाणे पिबन्तीः। मावस्तेन ईशत माघशꣳसः। परि वो हेती रुद्रस्य वृज्यात्।

उपेदमुपपर्चनम्। आसु गोषूपपृच्यताम्। उपर्षभस्य रेतसि। उपेन्द्र तव वीर्ये।।

२५ तासूर्या चन्द्रमसा विश्वभृत्तमा महत्। तेजो वसुमद्राजतो दिवि। सामात्मानौ चरतस्सामचारिणौ। ययो व्रतन्नममे जातु देवयोः।

उभावन्तौ परियात अम्र्या। दिवो न रश्मीꣳस्तनुतो व्यर्णवे। उभा भुवन्ती भुवना कविक्रतू। सूर्या न चन्द्रा चरतो हतामती।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पतीद्युमद्विश्वविदा उभा दिवः। सूर्या उभा चन्द्रमसा विचक्षणा। विश्ववारा वरिवोभा वरेण्या। तानोऽवतं मतिमन्ता महिव्रता।

विश्ववपरी प्रतरणा तरन्ता। सुवर्विदा-दृशये भूरिरश्मी। सूर्या हि चन्द्रा वसुत्वेष दरूशता। मनस्विनोभाऽनु चरतो नु सन्दिवम्।

अस्यश्रवो नद्यस्सप्त बिभ्रति। द्यावाक्षामा पृथिवी दरूशतँव्वपुः। अस्मे सूर्याचन्द्रमसाऽ-भिचक्षे। श्रद्धेकमिन्द्र चरतो विचर्तुरम्।

पूर्वापरञ्चरतो माययैतौ। शिशूक्रीडन्तौ परियातो अद्ध्वरम्। विश्वान्यन्यो भुवना-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽभिचष्टे। ऋतूनन्यो विदधज्जायते पुनः।।

*हिरण्यवर्णाश्शुचयः पावका यासा॒ँ राजा॑।। यासा॑न्देवा शिवेन मा चक्षुषा पश्यत।। आपो भद्रा आदित्पश्यामि।।

*[हिरण्यवर्णा श्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निँय्या गर्भन्दधिरे विरूपास्तान आपश्शꣳस्योना भवन्तु॥

यासा॒ँ राजा वरुणो याति मद्ध्ये सत्यानृते अवपश्यञ्जनानाम्। मधुश्चुतश्शुचयो याः पावकास्तान आपश्शꣳस्योना भवन्तु।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यासान्देवा दिवि कृण्वन्ति भक्षँय्या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्तान आपश्श ँ स्योना भवन्तु।।

शिवेन मा चक्षुषा पश्यताप शिशवया तनुवोपस्पृशत त्वचं मे। सर्वा ँ अग्नीँरफ्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त।।

आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः। तीव्रोरसो मधुपृचामरङ्गम आमा प्राणेन सह वर्चसागन्।।

आदित्पश्याम्युत वा शृणोम्यामा घोषो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छति वाङ्न आसाम्। मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपँय्यदा वः।]

नासदासीन्नो सदासीत्तदानीम्। नासीद्रजो नो व्योमापरोयत्। किमावरीवः कुह कस्य शर्मन्न्। अम्भः किमासीद्गहनङ्-गभीरम्।

न मृत्युरमृतन्तर्हि न। रात्रिया अह्न आसीत्प्रकेतः। आनीदवात ँ स्वधया तदेकम्। तस्माद्धान्यन्न परः किञ्चनास।

तम आसीत्तमसा गूढमग्रे प्रकेतम्। सलिलँसर्वमा इदम्। तुच्छेनाभ्वपिहितँ-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

य्यदासीत्। तमसस्तन्महिना जायतैकम्।

कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमँय्यदासीत्। सतो बन्धुमसति निरविन्दन्। हृदि प्रतीष्या कवयो मनीषा।

तिरश्चीनो विततो रश्मिरेषाम्। अधस्विदासी(३)दुपरिस्विदासी(३)त्। रेतोधा आसन्महिमान आसन्। स्वधा अवस्तात्प्रयतिः परस्तात्।

को अद्धा वेद क इह प्रवोचत्। कुत आजाता कुत इयँव्विसृष्टिः। अर्वाग्देवा अस्य विसर्जनाय। अथा को वेद यत आ

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बभूव।

इयँव्विसृष्टि र्यत आबभूव। यदि वा दधे यदि वा न। यो अस्याद्ध्यक्षः परमे व्योमन्। सो अङ्गवेद यदि वा न वेद।

किꣳस्विद्वनङ्क उ स वृक्ष आसीत्। यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदु तत्। यदद्ध्यतिष्ठद्भुवनानि धारयन्।

ब्रह्मवनं ब्रह्म स वृक्ष आसीत्। यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वः। ब्रह्माद्ध्यतिष्ठद्भुवनानि

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारयन्।

प्रातरग्निं प्रातरिन्द्र ँ हवामहे। प्रातर्मित्रावरुणा प्रातरश्विना। प्रातर्भगं पूषणं ब्रह्मणस्पतिम्। प्रातस्सोममुत रुद्र ँ हुवेम।

प्रातर्जितं भगमुग्र ँ हुवेम। वयं पुत्रमदितेर्यो विधर्ता। आद्ध्रश्चिद्यं मन्यमानस्तुरश्चित्। राजा चिद्यं भगं भक्षीत्याह।

भगप्रणेतर्भग सत्यराधः। भगेमान्धियमुदवददन्नः। भगप्रणो जनय गोभिरश्वैः। भग प्रनृभिर्नृवन्तस्स्याम।

उतेदानीं भगवन्तस्स्याम। उत प्रपित्व

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत मद्ध्ये अह्नाम्। उतोदिता मघवन्-
थ्सूर्यस्य। वयन्देवानाꣳ सुमतौ स्याम।

भग एव भगवाꣳ अस्तु देवाः। तेन वयं
भगवन्तस्स्याम। तन्त्वा भग सर्व
इज्जोहवीमि। स नो भग पुर एता भवेह।

समद्ध्वरा योषसो नमन्त। दधिक्रावेव
शुचये पदाय। अर्वाचीनँ व्वसुविदं भगन्नः।
रथमिवाश्वा वाजिन आवहन्तु।

अश्वावती र्गोमती र्न उषासः। वीरवती-
स्सदमुच्छन्तु भद्राः। घृतन्दुहाना विश्वतः
प्रपीनाः। यूयं पात-स्स्वस्तिभि-स्सदा नः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२६/२९ २६.१. अग्निर्नः पातु कृत्तिकाः। नक्षत्रन्देवमिन्द्रियम्। इदमासाँ-व्विचक्षणम्। हविरासञ्जुहोतन।।

यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा। स कृत्तिकाभिरभिसँव्वसानः। अग्निर्नो देवस्सुविते दधातु।।

२९.१. अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहा। अम्बायै स्वाहा दुलायै स्वाहा। नितत्न्यै स्वाहाऽभ्रयन्त्यै स्वाहा। मेघयन्त्यै स्वाहा वर्षयन्त्यैस्वाहा। चुपुणीकायैस्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२६.२. प्रजापते रोहिणी वेतुपत्नी। विश्वरूपा बृहती चित्रभानुः। सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदस्सवीराः।।

रोहिणी देव्युदगात्पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिꣳ हविषा वर्द्धयन्ती। प्रिया देवानामुपयातु यज्ञम्।।

२९.२. *प्रजापतये स्वाहा रोहिण्यै स्वाहा। रोचमानायै स्वाहा प्रजाभ्यस्स्वाहा।।*

२६.३. सोमो राजा मृगशीर्षेण आगन्। शिवन्नक्षत्रं प्रियमस्य धाम। आप्यायमानो बहुधा जनेषु। रेतः प्रजाँ-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

य्यजमाने दधातु।।

यत्ते नक्षत्रं मृगशीर्षमस्ति। प्रियꣳ राज-न्प्रियतमं प्रियाणाम्। तस्मै ते सोम हविषा विधेम। शन्न एधि द्विपदे शञ्चतुष्पदे।।

२९.३. सोमाय स्वाहा मृगशीर्षाय स्वाहा। इन्वकाभ्य-स्स्वाहौषधीभ्य-स्स्वाहा। राज्याय स्वाहाऽभिजित्यै स्वाहा।।

२६.४. आर्द्रया रुद्रः प्रथमान एति। श्रेष्ठो देवानां पतिरघ्नियानाम्। नक्षत्रमस्य हविषा विधेम। मा नः प्रजाꣳ रीरिषन्मोत वीरान्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेती रुद्रस्य परिणो वृणक्तु। आर्द्रा नक्षत्रञ्जुषता ँ हविर्नः। प्रमुञ्चमानौ दुरितानि विश्वा। अपाघश ँ सन्नुदतामरातिम्।।

२९.४. *रुद्राय स्वाहाऽऽर्द्रायै स्वाहा। पिन्वमानायै स्वाहा पशुभ्यस्स्वाहा।।*

२६.५. पुनर्नो देव्यदिति-स्स्पृणोतु। पुनर्वसूनः पुनरेताँ-य्यज्ञम्। पुनर्नो देवा अभियन्तु सर्वे। पुनः पुनर्वो हविषा यजामः।।

एवान देव्यदितिरनर्वा। विश्वस्य भर्त्री जगतः प्रतिष्ठा। पुनर्वसू हविषा वर्द्धयन्ती।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रियन्देवानामप्येतु पाथः।।

२९.५. अदित्यै स्वाहा पुनर्वसुभ्याम्। स्वाहा भूत्यै स्वाहा प्रजात्यै स्वाहा।।

२६.६. बृहस्पतिःप्रथमञ्जायमानः। तिष्यन्नक्षत्रमभि संबभूव। श्रेष्ठो देवानां पृतनासु जिष्णुः। दिशोऽनु सर्वा अभयन्नो अस्तु।।

तिष्यः पुरस्तादुतमद्ध्यतोनः। बृहस्पतिर्नः परिपातु पश्चात्। बाधेतान्द्वेषो अभयङ्कृणुताम्। सुवीर्यस्य पतयस्स्याम।।

२९.६. बृहस्पतये स्वाहा तिष्याय

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाहा। ब्रह्मवर्चसाय स्वाहा।।

२६.७. इदꣳसर्पेभ्यो हविरस्तु जुष्टम्। आश्रेषा येषामनुयन्ति चेतः। ये अन्तरिक्षं पृथिवीङ्क्षियन्ति। तेन स्सर्पासो हवमागमिष्ठाः।।

ये रोचने सूर्यस्यापि सर्पाः। ये दिवन्देवीमनु सञ्चरन्ति। येषामाश्रेषा अनुयन्ति कामम्। तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि।।

२९.७. सर्पेभ्यस्स्वाहाऽऽश्रेषाभ्यस्स्वाहा। दन्दशूकेभ्यस्स्वाहा।।

२६.८. उपहूताः पितरो ये मघासु।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोजवस-स्सुकृत-स्सुकृत्याः। ते नो नक्षत्रे हवमागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतञ्जुषन्ताम्॥

ये अग्निदग्धा येऽनग्निदग्धाः। येऽमुँल्लोकं पितरः क्षियन्ति। याँश्च विद्म याँउच न प्रविद्म। मघासु यज्ञँसुकृत-ञ्जुषन्ताम्।।

२९.८. पितृभ्य-स्स्वाहा मघाभ्यः। स्वाहाऽनघाभ्य-स्स्वाहाऽगदाभ्यः। स्वाहाऽरुन्धतीभ्य-स्स्वाहा।।

२६.९. गवां पतिः फल्गुनीनामसि त्वम्। तदर्यमन्वरुण मित्र चारु। तन्त्वा वयँ सनितारँ सनीनाम्। जीवा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवन्तमुप सँव्विशेम।।

येनेमा विश्वा भुवनानि सञ्जिता। यस्य देवा अनुसँय्यन्ति चेतः। अर्यमा राजाऽजरस्तुविष्मान्। फल्गुनीनामृषभो रोरवीति।।

२९.९. *अर्यम्णे स्वाहा फल्गुनीभ्या ँ स्वाहा। पशुभ्य-स्स्वाहा।।*

२६.१०. श्रेष्ठो देवानां भगवो भगासि। तत्त्वा विदुः फल्गुनीस्तस्य वित्तात्॥ अस्मभ्यङ्क्षत्रमजर ँ सुवीर्यम्। गोमदश्वावदुप सन्नुदेह ।।

भगोह दाता भग इत्प्रदाता। भगो देवीः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

फल्गुनीराविवेश। भगस्येत्तं प्रसवङ्गमेम। यत्र देवैस्सधमादं मदेम।।

२९.१०. भगाय स्वाहा फल्गुनीभ्याꣳस्स्वाहा। श्रैष्ठ्याय स्वाहा।।

२६.११. आयातु देव-स्सवितोपयातु। हिरण्ययेन सुवृता रथेन। वहन् हस्तꣳ सुभगँव्विद्मनापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ।।

हस्तः प्रयच्छत्त्वमृतँ-व्वसीयः। दक्षिणेन प्रतिगृभ्णीम एनत्। दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९.११. सवित्रे स्वाहा हस्ताय।

स्वाहा ददते स्वाहा पृणते। स्वाहा प्रयच्छते स्वाहा प्रतिगृभ्णते स्वाहा।।

२६.१२. त्वष्टा नक्षत्रमभ्येति चित्राम्। सुभगꣳससँय्युवतिꣳ रोचमानाम्। निवेशयन्नमृतान्मर्त्याꣳश्च। रूपाणि पिꣳशन्भुवनानि विश्वा।।

तन्नस्त्वष्टा तदु चित्रा विचष्टाम्। तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्नः प्रजाँव्वीरवतीꣳ सनोतु। गोभिर्नो अश्वैस्समनक्तु यज्ञम्।।

२९.१२. त्वष्ट्रे स्वाहा चित्रायै स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चैत्राय स्वाहा प्रजायै स्वाहा।।

२६.१३. वायुर्नक्षत्रमभ्येति निष्ट्याम्। तिग्मशृङ्गो वृषभो रोरुवाणः। समीरयन्भुवना मातरिश्वा। अपद्वेषाꣳसि नुदतामरातीः।।

तन्नो वायुस्तदु निष्ट्या शृणोतु। तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्नो देवासो अनु जानन्तु कामम्। यथा तरेम दुरितानि विश्वा।

२९.१३. वायवे स्वाहा निष्ट्यायै स्वाहा। कामचाराय स्वाहाऽभिजित्यै स्वाहा।

२६.१४. दूरमस्मच्छत्रवो यन्तु

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भीताः। तदिन्द्राग्नी कृणुतान्तद्विशाखे। तन्नो देवा अनुमदन्तु यज्ञम्। पश्चात्पुरस्तादभयन्नो अस्तु।।

नक्षत्राणामधिपत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ। विषूचश्शत्रूनपबाधमानौ। अपक्षुधन्नुदतामरातिम्।।

२९.१४. इन्द्राग्निभ्याᳬस्वाहा विशाखाभ्याᳬस्वाहा। श्रैष्ठ्याय स्वाहाऽभिजित्यै स्वाहा।।

२६.१५. पूर्णा पश्चादुत पूर्णा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरस्तात्। उन्मद्ध्यतः पौर्णमासी जिगाय। तस्यान्देवा अधि सँव्वसन्तः। उत्तमे नाक इह मादयन्ताम्।।

पृथ्वी सुवर्चा युवति स्सजोषाः। पौर्णमास्युदगाच्छोभमाना। आप्यायन्ती दुरितानि विश्वा। उरुन्दुहाँ-य्यजमानाय यज्ञम्।।

२९.१५. पौर्णमास्यै स्वाहा कामाय स्वाहा गत्यै स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२७/३० २७.१. ऋद्ध्यास्म हव्यै र्नमसो-पसद्य। मित्रन्देवं मित्रधेयन्नो अस्तु। अनूराधान् हविषा वर्द्धयन्तः। शतञ्जीवेम शरदस्सवीराः।।

चित्र-न्नक्षत्र-मुद गात्पुरस्तात्। अनूराधास इति यद्वदन्ति। तन्मित्र एति पथिभि-र्देवयानैः। हिरण्ययै-र्विततैरन्तरिक्षे।।

३०.१. मित्राय स्वाहाऽनूराधेभ्यस्स्वाहा। मित्रधेयाय स्वाहाऽभिजित्यै स्वाहा।

२७.२. इन्द्रो ज्येष्ठामनु नक्षत्रमेति। यस्मिन्वृत्रँ-व्वृत्रतूर्ये ततार। तस्मिन्वयममृत-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्दुहानाः। क्षुधन्तरेम दुरितिन्दुरिष्टिम्।।

पुरन्दराय वृषभाय धृष्णवे। अषाढाय सहमानाय मीढुषे। इन्द्राय ज्येष्ठा मधुमद्दुहाना। उरुङ्कृणोतु यजमानाय लोकम्।।

३०.२. इन्द्राय स्वाहा ज्येष्ठायै स्वाहा। ज्यैष्ठ्याय स्वाहाऽभिजित्यै स्वाहा।।

२७.३. मूलं प्रजाँव्वीरवतीँव्विदेय। पराच्येतु निर्ऋतिः पराचा। गोभिर्नक्षत्रं पशुभिस्समक्तम्। अहर्भूयाद्यजमानाय मह्यम्।।

अहर्नो अद्य सुविते दधातु। मूलन्नक्षत्र-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिति यद्वदन्ति। पराचीँव्वाचा निर्ऋतिन्नुदामि। शिवं प्रजायै शिवमस्तु मह्यम्।।

३०.३. प्रजापतये स्वाहा मूलाय स्वाहा। प्रजायै स्वाहा।।

२७.४. या दिव्या आपः पयसा संबभूवुः। या अन्तरिक्ष उत पार्थिवीर्याः। यासामषाढा अनुयन्ति कामम्। ता न आपश्शꣳस्योना भवन्तु।।

याश्च कूप्या याश्च नाद्या-स्समुद्रियाः। याश्च वैशन्तीरुत प्रासचीर्याः। यासामषाढा मधु भक्षयन्ति। तान आपश्शꣳस्योनाभवन्तु।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३०.४. अद्भ्यस्स्वाहाऽषाढाभ्यस्स्वाहा। समुद्राय स्वाहा कामाय स्वाहा। अभिजित्यै स्वाहा।।

२७.५. तन्नो विश्वे उपशृण्वन्तु देवाः। तदषाढा अभिसँय्यन्तु यज्ञम्। तन्नक्षत्रं प्रथतां पशुभ्यः। कृषिर्वृष्टि- र्यजमानाय कल्पताम्।।

शुभ्राः कन्या युवतय-स्सुपेशसः। कर्मकृत स्सुकृतो वीर्यावतीः। विश्वान्देवान् हविषा वर्द्धयन्तीः। अषाढाः काममुपयान्तु यज्ञम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३०.५. विश्वेभ्यो देवेभ्य स्स्वाहाऽ षाढाभ्य स्स्वाहा। अनपजय्याय स्वाहा जित्यै स्वाहा।।

२७.६. यस्मिन्ब्रह्माभ्यजयथ्सर्वमेतत्। अमुञ्च लोकमिदमूच सर्वम्। तन्नो नक्षत्रमभिजिद्विजित्य। श्रियन्दधात्वहणीयमानम्।।

उभौ लोकौ ब्रह्मणा सञ्जितेमौ। तन्नो नक्षत्रमभिजिद्विचष्टाम्। तस्मिन्वयं पृतनास्सञ्जयेम। तन्नो देवासो अनुजानन्तु कामम्।

३०.६. ब्रह्मणे स्वाहाऽभिजिते स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मलोकाय स्वाहाऽभिजित्यै स्वाहा।।

२७.७. शृण्वन्ति श्रोणाममृतस्य गोपाम्। पुण्यामस्या उपशृणोमि वाचम्। महीन्देवीँ व्विष्णुपत्नीमजूर्याम्। प्रतीचीमेना७ हविषा यजामः।।

त्रेधा विष्णुरुरुगायो विचक्रमे। महीन्दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणैति श्रव इच्छमाना। पुण्यꣳश्लोकँ य्यजमानाय कृण्वती।।

३०.७. विष्णवे स्वाहा श्रोणायै स्वाहा। श्लोकाय स्वाहा श्रुताय स्वाहा।।

२७.८. अष्टौ देवा वसव

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्सोम्यासः। चतस्रो देवीरजराश्श्रविष्ठाः। ते यज्ञं पान्तु रजसः परस्तात्। सँव्वथ्सरीणममृतꣳस्वस्ति।।

यज्ञन्नः पान्तु वसवः पुरस्तात्। दक्षिणतो ऽभियन्तु श्रविष्ठाः। पुण्यन्नक्षत्रमभि सँव्विशाम। मा नो अरातिरघशꣳसागन्न्।।

३०.८. वसुभ्य स्स्वाहा श्रविष्ठाभ्य स्स्वाहा। अग्राय स्वाहा परीत्यै स्वाहा।।

२७.९. क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणाꣳ शतभिषग्वसिष्ठः। तौ देवेभ्यः कृणुतो दीर्घमायुः। शतꣳ सहस्रा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेषजानि धत्तः।।

यज्ञन्नो राजा वरुण उपयातु। तन्नो विश्वे अभिसँय्यन्तु देवाः। तन्नो नक्षत्रꣳ शतभिषग्-जुषाणम्। दीर्घमायुः प्रतिरद्भेषजानि।।

३०.९. *वरुणाय स्वाहा शतभिषजे स्वाहा। भेषजेभ्य स्स्वाहा।।*

२७.१०. अज एकपादुदगात्पुरस्तात्। विश्वा भूतानि प्रतिमोदमानः। तस्य देवाः प्रसवँ य्यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः।।

विभ्राजमान स्समिधान उग्रः। आन्तरिक्ष-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुहृदगन्धाम्। तꣳसूर्यन्देवमजमेकपादम्। प्रोष्ठपदासो अनुयन्ति सर्वे।।

३०.१०. अजायैकपदे स्वाहा प्रोष्ठपदेभ्य स्स्वाहा। तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा।।

२७.११. अहिर्बुदध्नियः प्रथमान एति। श्रेष्ठो देवानामुत मानुषाणाम्। तं ब्राह्मणा स्सोमपा स्सोम्यासः। प्रोष्ठपदासो अभिरक्षन्ति सर्वे।।

चत्वार एकमभिकर्म देवाः। प्रोष्ठपदास इति यान् वदन्ति। ते बुदध्नियं परिषद्यꣳ

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तुवन्तः। अहिꣳ रक्षन्ति नमसोपसद्य।।

३०.११. अहये बुद्ध्नियाय स्वाहा प्रोष्ठपदेभ्य स्वाहा। प्रतिष्ठायै स्वाहा।।

२७.१२. पूषा रेवत्यन्वेति पन्थाम्। पुष्टिपती पशुपा वाजबस्त्यौ। इमानि हव्या प्रयता जुषाणा। सुगैर्नो यानैरुपयाताँय्यज्ञम्।।

क्षुद्रान्पशून्रक्षतु रेवती नः। गावो नो अश्वाꣳअन्वेतु पूषा। अन्नꣳरक्षन्तौ बहुधा विरूपम्। वाजꣳसनुताँय्यजमानाय यज्ञम्।।

३०.१२. पूष्णे स्वाहा रेवत्यै स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशुभ्य स्स्वाहा।।

२७.१३. तद्श्विनावश्वयुजोप-

याताम्। शुभङ्गमिष्ठौ सुयमेभिरश्वैः।

स्वन्नक्षत्रꣳ हविषा यजन्तौ। मद्ध्वा संपृक्तौ

यजुषा समक्तौ।।

यौ देवानां भिषजौ हव्यवाहौ। विश्वस्य

दूतावमृतस्य गोपौ। तौ नक्षत्रञ्जुजुषाणोप-

याताम्। नमोऽश्विभ्याङ्कृणुमोऽश्वयुग्भ्याम्।।

३०.१३. अश्विभ्याꣳस्वाहाऽश्वयुग्भ्याꣳ

स्वाहा। श्रोत्राय स्वाहा श्रुत्यै स्वाहा।।

२७.१४. अपपाप्मानं भरणी-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्भरन्तु। तद्यमो राजा भगवान् विचष्टाम्। लोकस्य राजा महतो महान् हि। सुगन्नः पन्थामभयङ्कृणोतु।।

यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिञ्चन्त देवाः। तदस्य चित्रꣳ हविषा यजाम। अपपाप्मानं भरणीर्भरन्तु।।

३०.१४. यमाय स्वाहाऽपभरणीभ्यस्स्वाहा। राज्याय स्वाहाऽभिजित्यै स्वाहा।।

*२७.१५. निवेशनी यत्ते देवा अदधुः।।

*[निवेशनी सङ्गमनी वसूनाँ-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्विश्वा रूपाणि वसून्यावेशयन्ती। सहस्र-
पोषꣳ सुभगा रराणा सा न आगन्वर्चसा
सँव्विदाना।।

*यत्ते देवा अदधुर्भागधेयमममावास्ये
सँव्वसन्तो महित्वा। सा नो यज्ञं पिपृहि
विश्ववारे रयिन्नो धेहि सुभगे सुवीरम्।।]

३०.१५. अमावास्यायै स्वाहा
कामाय स्वाहा गत्यै स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२८/३१ *२८.१. नवोनवो भवति जायमानो यमादित्या अꣳशुमाप्याययन्ति।।

*[नवोनवो भवति जायमानोऽह्नाङ्केतुरुषसामेत्यग्रे। भागन्देवेभ्यो विदधात्यायन्प्रचन्द्रमास्तिरति दीर्घमायुः।।

यमादित्या अꣳशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति। तेन नो राजा वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः।]

३१.१. चन्द्रमसे स्वाहा प्रतीदृश्यायै स्वाहा। अहोरात्रेभ्य स्स्वाहाऽर्द्धमासेभ्य स्स्वाहा। मासेभ्य स्स्वाहर्तुभ्यस्स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सँव्वथ्सराय स्वाहा।

२८.२. ये विरूपे समनसा सँव्व्ययन्ती। समानन्तन्तुं परितातनाते। विभू प्रभू अनुभू विश्वतो हुवे।तेनो नक्षत्रे हवमागमेतम्।।

वयन्देवी ब्रह्मणा सँव्विदानाः। सुरत्नासो देववीतिन्दधानाः। अहोरात्रे हविषा वर्द्धयन्तः। अतिपाप्मानमतिमुक्त्यागमेम।।

३१.२. अह्ने स्वाहा रात्रियै स्वाहा। अतिमुक्त्यै स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२८.३. प्रत्युवदृश्यायती। व्युच्छन्ती दुहिता दिवः। अपो मही वृणुते चक्षुषा। तमो ज्योतिष्कृणोति सूनरी।।

उदुस्त्रियास्सचते सूर्यः। सचा उद्यन्नक्षत्रमर्चिमत्। तवेदुषो व्युषि सूर्यस्य च। संभक्तेन गमेमहि।।

३१.३. उषसे स्वाहा व्युष्ट्यै स्वाहा। व्यूषुष्यै स्वाहा व्युच्छन्त्यै स्वाहा। व्युष्टायै स्वाहा।।

२८.४. तन्नो नक्षत्रमर्चिमत्। भानुमत्तेज उच्चरत्। उपयज्ञमिहागमत्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रनक्षत्राय देवाय। इन्द्रायेन्दुꣳहवामहे। स न स्सविता सुवथ्सनिम्। पुष्टिदाँ व्वीरवत्तमम्।

३१.४. नक्षत्राय स्वाहोदेष्यते स्वाहा। उद्यते स्वाहोदिताय स्वाहा। हरसे स्वाहा भरसे स्वाहा। भ्राजसे स्वाहा तेजसे स्वाहा। तपसे स्वाहा ब्रह्मवर्चसाय स्वाहा।

*२८.५-१०. उदुत्यञ्चित्रम्। अदितिर्न उरुष्यतु महीमूषु मातरम्। इदँव्विष्णुः प्रतद्विष्णुः। अग्निर्मूर्द्धा भुवः। अनु नो द्यानुमतिरन्विदनुमते त्वम्। हव्यवाहꣳस्विष्टम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

*२८.५.[उदुत्यज्जातवेदसन्देवँ-
व्वहन्ति केतवः। दृशे विश्वाय सूर्यम्।
चित्रन्देवाना-मुदगादनीक-ञ्चक्षु-र्मित्रस्य
वरुणस्याग्नेः। आऽप्राद्यावापृथिवी अन्तरिक्षꣳ
सूर्य आत्मा जगतस्तस्थुषश्च।।

३१.५. सूर्याय स्वाहा नक्षत्रेभ्य
स्स्वाहा। प्रतिष्ठायै स्वाहा।।

*२८.६. [अदितिर्न उरुष्यत्वदिति
श्शर्म यच्छतु। अदितिः पात्वꣳहसः।।

महीमूषु मातरꣳ सुव्रतानामृतस्य
पत्नीमवसे हुवेम। तुविक्षत्रामजरन्तीमुरूचीꣳ

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुशर्माणमदिति ँ सुप्रणीतिम्।।]

३१.६. अदित्यै स्वाहा प्रतिष्ठायै स्वाहा।

*२८.७.[इदँव्विष्णु र्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपा ँ सुरे।।

प्रतद्विष्णु स्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा।।]

३१.७. विष्णवे स्वाहा यज्ञाय स्वाहा। प्रतिष्ठायै स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

*२८.८. [अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳरेताꣳसि जिन्वति।।

भुवो यज्ञस्य रजसश्चनेता यत्रानियुद्भिस्सचसे शिवाभिः। दिवि मूर्द्धान- न्दधिषे सुवर्षाज्जिह्वामग्नेचकृषे हव्यवाहम्]।।

*२८.९.[अनु नोऽद्यानुमति र्यज्ञन्देवेषु मन्यताम्। अग्निश्च हव्यवाहनो भवता- न्दाशुषे मयः।।

अन्विदनुमते त्वं मन्यासैशञ्चनः कृधि। क्रत्वेदक्षाय नोहिनु प्रण आयूꣳषि तारिषः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

*२८.१०.[हव्यवाहमभिमातिषाहम्। रक्षोहणं पृतनासु जिष्णुम्। ज्योतिष्मन्तन्दीद्यतं पुरन्धिम्। अग्निꣳस्विष्टकृतमाहुवेम।

स्विष्टमग्ने अभितत्पृणाहि। विश्वा देव पृतना अभिष्य। उरुन्नः पन्थां प्रदिशन्विभाहि। ज्योतिष्मद्धेह्यजरन्न आयुः।।]

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२ दधिक्राव्णो अकारिष-ञ्जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रण आयूꣳषि तारिषत्।।

आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे।।

यो वश्शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।।

तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।।

३३ उदुत्तमँ-व्वरुणपाशमस्मदवाधम-व्विँमद्ध्यमꣳश्रथाय। अथा वयमादित्यव्रते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तवानागसो अदितये स्याम।।

अस्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राडविश्वेत्तानि वरुणस्य व्रतानि।।

यत्किञ्चेदं-व्वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः।।

कितवासो यद्रिरिपु र्न दीवि यद्वा घा सत्यमुत यन्न विद्म। सर्वा ताविष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः।।

अवते हेडो वरुण नमोभिरव यज्ञेभिरीमहे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाꣳसि शिश्रथः कृतानि।।

तत्वायामि ब्रह्मणा वन्दमान-स्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा न आयुः प्रमोषीः।।

३४ हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निँय्या गर्भ-न्दधिरे विरूपास्तान आपश्शꣳस्योना भवन्तु।

यासाꣳराजा वरुणो याति मद्ध्ये सत्या-नृते अवपश्यञ्जनानाम्। मधुश्चुत- श्शुचयो याः पावकास्तान आपश्शꣳस्योना भवन्तु।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यासान्देवा दिवि कृण्वन्ति भक्षँय्या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रस्ता न आपश्शꣳ स्योना भवन्तु।।

शिवेन मा चक्षुषा पश्यताप-शिवया तनुवोपस्पृशत त्वचं मे। सर्वाꣳ अग्नीꣳ रफ्सुषदो हुवे वो मयि वर्चोबलमोजो निधत्त।।

३५ पवमान स्सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा।।

पुनन्तु मा देव जनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूँरनु।।

यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन पुनीमहे।।

उभाभ्यान्देव सवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे।।

वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वी-स्तनुवो वीतपृष्ठाः। तया मदन्त स्सधमाद्येषु। वयँस्याम पतयो रयीणाम्।।

वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषिरो मयोभूः। द्यावापृथिवी पयसा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्।।

बृहद्भिः स्सवितः स्तृभिः। वरूषिष्ठै र्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा।।

येन देवा अपुनत। येनापो दिव्यङ्कशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे।।

यः पावमानीरद्ध्येति। ऋषिभिः स्सम्भृतꣳ रसम्। सर्वꣳ स पूतमश्नाति। स्वदितं मातरिश्वना।।

पावमानीर्यो अद्ध्येति। ऋषिभिस्सम्भृतꣳ रसम्। तस्मै सरस्वती दुहे। क्षीरꣳ सर्पिर्मधूदकम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पावमानी स्स्वस्त्ययनीः। सुदुघा हि पयस्वतीः। ऋषिभि स्सम्भृतो रसः। ब्राह्मणेष्वमृतꣳहितम्।।

पावमानी र्दिशन्तु नः। इमँल्लोकमथो अमुम्। कामान्थ्समर्द्धयन्तु नः। देवीर्देवै-स्समाभृताः।।

पावमानी स्स्वस्त्ययनीः। सुदुघा हि घृतश्चुतः। ऋषिभि स्सम्भृतो रसः। ब्राह्मणेष्वमृतꣳहितम्।।

येन देवाःपवित्रेण। आत्मानं पुनते सदा। तेन सहस्रधारेण। पावमान्यः पुनन्तु मा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राजापत्यं पवित्रम्। शतोद्याम७ हिरण्मयम्। तेन ब्रह्मविदो वयम्। पूतं ब्रह्म पुनीमहे।।

इन्द्रस्सुनीती सह मा पुनातु। सोम-स्स्वस्त्या वरुण-स्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयन्त्या पुनातु।।

३६ भूर्भुवस्सुवः। तच्छँय्योरावृणीमहे। गातुँ-य्यज्ञाय। गातुँय्यज्ञपतये। दैवी-स्स्वस्तिरस्तु नः। स्वस्ति-मानुषेभ्यः। ऊर्द्ध्वञ्जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शञ्चतुष्पदे।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।।ओं शान्तिश्शान्तिश्शान्तिः।।

३७ यो ब्रह्मा ब्रह्मण उज्जभार प्राणै-
श्शिरः कृत्तिवासाः पिनाकी। ईशानो देवस्स
न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन।।

विभ्राजमान स्सरिरस्य मद्ध्याद्रोचमानो
घर्मरुचिर्य आगात्। स मृत्युपाशानपनुद्य
घोरानिहायुषेणो घृतमत्तु देवः।।

ब्रह्मज्योति र्ब्रह्मपत्नीषु गर्भंय्यमादधा-
त्पुरुरूपं जयन्तम्। सुवर्णरम्भ ग्रहमर्कमर्च्यम्
तमायुषे वर्द्धयामो घृतेन।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रियँल्लक्ष्मीमौबलामम्बिकां गां षष्ठीञ्च यामिन्द्रसेनेत्युदाहुः। तां विद्यां ब्रह्मयोनि७ सरूपामिहायुषे तर्पयामो घृतेन।।

दाक्षायण्य-स्सर्वयोन्य-स्सयोन्य-स्सहस्रशो विश्वरूपा विरूपाः। ससूनव-स्सपतय-स्सयूथ्या आयुषेणो घृतमिदञ्जुषन्ताम्।।

दिव्यागणा बहुरूपाः पुराणा आयुश्चिच्छदो नः प्रमथ्नन्तु वीरान्। तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजा७रीरिषो मोत वीरान्।।

एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति भुवन७सांपराये

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स नो हविर्घृतमिहायुषेऽत्तु देवः।।

वसून्रुद्रानादित्यान्मरुतोऽथ साद्ध्यानृभून् यक्षान्गन्धर्वाँश्च पितृँश्च विश्वान्। भृगून्थ्सर्पाँश्चाङ्गिरसोऽथ सर्वान्घृतं हुत्वा स्वायुष्या महयाम शश्वत्।।

३८ विष्णो त्वन्नो अन्तमश्शर्म यच्छ सहन्त्य। प्रते धारा मधुश्चुत उथ्सन्दुह्रते अक्षितम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३९ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि।।

४० आभिर्गीर्भि र्यदतोन ऊनमाप्यायय हरिवो वर्द्धमानः। यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अधतेस्याम। ब्रह्म प्रावादिष्म तन्नो माहासीत्।

ओं शान्तिश्शान्तिश्शान्तिः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवस्यत्वा सवितुः प्रसवे। अश्विनो र्बाहुभ्याम्। पूष्णो हस्ताभ्याम्। अश्विनो भैषज्येन। तेजसे ब्रह्मवर्चसायाभिषिञ्चामि।।

देवस्य त्वा सवितुः प्रसवे। अश्विनो र्बाहुभ्याम्। पूष्णो हस्ताभ्याम्। सरस्वत्यै भैषज्येन। वीर्यायान्नाद्यायाभिषिञ्चामि।।

देवस्य त्वा सवितुः प्रसवे। अश्विनो र्बाहुभ्याम्। पूष्णो हस्ताभ्याम्। इन्द्रस्येन्द्रियेण। श्रियै यशसे बलायाभिषिञ्चामि।।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूष्णो हस्ताभ्याᳬ सरस्वत्यै वाचो यन्तु-
र्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य
त्वा साम्राज्येनाभिषिञ्चामि बृहस्पतेस्त्वा
साम्राज्येनाभिषिञ्चामि।।

आयुराशास्ते। सुप्रजास्त्वमाशास्ते।
सजातवनस्यामाशास्ते। उत्तरान्देवयज्यामा-
शास्ते। भूयो हविष्करणमाशास्ते। दिव्यन्धा-
माशास्ते। विश्वं प्रियमाशास्ते। यदनेन
हविषाऽऽशास्ते।।

तदश्यात्तदृद्ध्यात्। तदस्मै देवा
रासन्ताम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रुपदादिवेन्मुमुचानः। स्विन्न स्स्नात्वी मलादिव। पूतं पवित्रेणेवाज्यम्। आप शशुन्धन्तु मैनसः। भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः।।

।।हरिः ओ(३)म्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.